3035

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीअन्योक्तिशतकम् ॥

( कर्ता—श्रीदर्शनविजयजी )

इदं पुस्तकं जामनगरवास्तव्य पं. हीरालाल हंसराजेन स्वकीये
श्रीजैनभास्करोदयमुद्रणालये मुद्रितव्यम्

वीर सं. २४६४ विक्रम सं. १९९४ सने १९३७

किं. रु. ०—८—०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्री जिनाय नमः ॥

# ॥ श्रीअन्योक्तिशतकम् ॥

( कर्ता—श्रीदर्शनविजयजी )

छापी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज-( जामनगरवाळा )

वाग्देवीस्फुरदैंकृतिश्रितनमो मंत्रापनिद्रस्मृति—प्रोद्भूतप्रबलप्रभावपटलप्रौढोभवत्सत्सखः ॥ कुर्वेऽन्योक्तिलसत्कवित्वशतकं विद्वत्सभारंजनं । नत्वा सत्वशिवंकरं विनयतः श्रीपार्श्वतीर्थंकरं ॥ १ ॥ रत्नाकरोऽसि कमलाजनकोऽस्यमान—मानोऽसि निर्मलसुधारसपेशलोऽसि ॥ दत्सेंबुबिंदुमपि नो तृषितस्य तत्किं । संदर्शयन् वदनमर्णव लज्जसे न ॥ २ ॥ संवर्धमानकमलोदयशालिनस्ते । व्रीडापि किं जलनिधे हृदि नाभ्युदेति ॥ धत्से पुरो यदवलोककलोकपंक्ते—डिंडीरदारुतृणकाणवराटकानि ॥ ३ ॥ सितच्छद

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विकस्वरस्फुरदनेकपंकेरुहं । सरोवरमनाविलोज्ज्वलजलं विलासोचितं ॥ अहारि विधिना परं सलिलदुग्धयोर्व्यक्तिकृ—दृगुणस्तु तव सुस्थितस्तदिह संपदः पुष्कलाः ॥ ४ ॥ विश्वं लोकमहर्मणे स्वकिरणैरुद्योतयस्यन्वहं । बिभ्राणः सकलग्रहाधिपतितां तेजस्विनामग्रणीः ॥ त्वं चेत्कोमलकेलिकाननमथो बब्बूलवृक्षादिकान् । कामं तुल्यतयैव तापयसि ते कामौचितीं ब्रूमहे ॥ ५ ॥ श्रीचंदनद्रुम शिवानि भवंतु तुभ्यं । निंबोऽपि यन्निजसमो विहितोंतिकस्थः ॥ ये प्रोन्नता गुणभृतः किल निंदनीयं । ते कुर्वते निजसमं ह्यविलंबितेन ॥ ६ ॥ अपसर भ्रमर त्वमितो यदा—यतिशुभाय न ते सुरभिग्रहः ॥ कुटिलकंटककोटिभिरावृता । मृतिमियं खलु केतकी दास्यति ॥ ७ ॥ तारस्वरेण परभृत । निगदसि मध्वेव कारणं तत्र ॥ अथ तर्हि तव महिमा । विना वसंतं यदि ब्रूयाः ॥ ८ ॥ परिमलनिलय समुज्ज्वल । गुणाढ्यघनसार का प्रकृतिरेषा ॥ बाह्याभ्यंतरमलिनं । यत्तिष्ठसि नो विनैंगालं ॥ ९ ॥

तनोति तव विभ्रमं मणिमनोहरा मुद्रिका । त्यजंस्त्वमपि तां कथं कर न लज्जसे सांप्रतं ॥ इयं तु गुणसुंदरी यदुपसंगिनी भाविनी । तमेव खलु भूषयिष्यति विचारय स्वात्मना ॥ १० ॥ आकारेण

For Private and Personal Use Only

सहाभिवर्धिततया वर्णेन रूपेण च । फुल्लच्छालिरसालशालशिखरस्थानासनेनापि च ॥ रे काकोल दधासि साम्यमधुना पुंस्कोकिलेन त्वया–दानेयो मधुरध्वनिः परमहो कस्यैषणाभिस्त्वया ॥ ११ ॥ मृगनाभि सौरभभरै–र्मुदितो न हि मारयति मां हरिः ॥ हरिणेति विश्वसितहृ–द्भुतेर्विरमैष येन न भवद्गुणवित् ॥ १२ ॥ किं खिद्यसे कोकिल वीक्ष्य काकं । रसालशाखां परिशीलयंतं ॥ तथा सृजैनं कलया कयाचि–द्यथा तया मन्यत एव नैषः ॥१३॥ खिद्यस्व मा चंपक मामुपैति । सौरभ्यवंतं मधुपो न यस्मात् ॥ क्षुद्रः कियानेष यतो नरेंद्रै–स्त्वं मौलिमाल्यं क्रियसे गुणज्ञैः ॥ १४ ॥ यैः शोभां समवापितोऽध्वगजनानंदी च येभ्योऽभवः । सच्छायश्च विहंगयुग्मपटलीलोलानिवासास्पदं ॥ दूरं तान्यपि यद्दलानि विटपिन् विक्षेपय-स्येष्यदां । पत्राणां स्पृहया दुराशय ततो धिक् तेऽधमं चेष्टितं ॥ १५ ॥ सच्चक्रवाककलहंसकपोतकेकि —द्वंद्वोपभोग्यविमलोदकपूरपूर्णे ॥ लोकं पुनात्यपि तृषामपि संहरंती । धिक्त्वां नदि व्रजसि वक्रपथेन यत्त्वं ॥ १६ ॥ कल्लोलिनोरमण यन्निजमंगजात—मुत्संगवर्धितमुदारगुणाभिरामं ॥ निर्दोषशंखमपकर्षसि नैव किंचि–द्दत्से च तेन महतस्तव नैव युक्तं ॥ १७ ॥ सारंग रागरसिको निजकीयशीर्षं । धुन्वन्नमस्य-

सितरां च दधासि रागं ॥ सर्वं वृथैव तव भक्तिमिमां न वेत्ति । यल्लुब्धकोऽयमदयश्च गुणानभिज्ञः ॥ ॥ १८ ॥ श्रीचंदनस्तु विफलोऽपि जगज्जनानां । निःकारणं स्ववपुषैव भिनत्ति तापं ॥ भिल्लातक त्वमथ यत्पिटकान् विधत्से । संपर्कतोऽपि दहसे विपरीतरीतिः ॥ १९ । रक्षापीक्षुरसेन संश्रितवतो स्वं स्वस्वरूपीकृता । मिष्टख्यातिमवापिता गुड इति श्रेयान् कनिष्टोऽप्ययं ॥ निंब त्वं कटुकं फलं लघु पुरस्कुर्वन् श्रितानां द्विज—श्रेणीनां तदतोऽधमाधम हि ते धिग्पर्युपास्तेः फलं ॥ २० ॥

इयत्कालं त्वासीत्सरसकलिकापेशलफलेः । परिक्षीणस्तस्मात्त्वदुचित इति त्वं च वसतिं ॥ चकर्षाथान्यत्र द्विक विचर येनैष सफलो । रसालः संजातस्तदिह पिकराजो विलसतां ॥ २१ ॥ आः क्षुद्रावकराकरातिकठिनोच्चत्वप्रवृद्धस्मयो । निर्मास्युच्चतयातितुंगगिरिणा साकं तुलामुद्धतः ॥ बीभत्सः क्व भवान् क्व एष बहुलच्छेकालिलीलागृहं । स्फुर्जत्तालतमालसालबकुलादिद्रूल्लसद्विभ्रमः ॥ २२ ॥ उत्तुंगशैल भवतः प्रणिपात आस्तां । नंदंतु पेशलरमालमुखाश्च वृक्षाः ॥ आसादितैव सकलाभिमतार्थसिद्धि—र्नोपद्रुतं मम यतः किल हिंस्रजीवैः ॥ २३ ॥ अभ्रं समीक्ष्य शरदभ्रमनोहरश्रि । याचस्व



For Private and Personal Use Only

मा चतुरचातक चाटुवाचा ॥ अस्माद्वृथोन्नतिमतस्तव नास्ति सिद्धि–र्निस्सार एष भवतो विफलः प्रयासः ॥ २४ ॥ ज्ञात्वा भवंतममलं परिशीलनाय । प्राप्ताः सरोवर वयं खलु राजहंसाः ॥ प्रादुःकृतं च कलुषं प्रथमं त्वयांबु । सेव्यं सरः सहजनिर्मलमानसं नः ॥ २५ ॥ येषामंकतले चिराय विलुठन् बालोऽपि वृद्धोऽभवः । स्वादंस्वादमुदारपल्लवदलश्रेणीरियद्वासरान् ॥ यस्याः स्वादुपयःप्रवाहपटलैः क्रीडामकार्षीः करिन् । मथ्नंस्तानथ पादपांश्च सरितः कूलं न किं लज्जसे ॥ २६ ॥ रे रे बलाहक मनोज्ञमरालमाला–मध्याधिवासकतया बुबुधे जनस्त्वां ॥ हंसं ततः स्मयभरं ननु मा कृथास्त्वं । शोभानिदानमिदमीयगुणानुभावः ॥ २७ ॥

निश्शेषेषु सरस्सु शैवलमिलज्जंबालजालं जलं । पर्यन्यैः सुकुमारपंकजवनं निर्मूलमुन्मूलितं ॥ आधारस्त्वमथैव मानससरः संसेव्यमस्मादृशा–मेकं पंकजपेशलं न हि ततो धार्यं त्वया शैवलं ॥ २८ ॥ बाह्याडंबरधारिणः परिमलभ्रष्टान् प्रफुल्लानिमा–नुद्वीक्ष्य प्रसवांश्च शामलितरोः श्रीराजहंसोत्तम ॥ नीरक्षीरविवेचकोऽपि निपुणप्रष्टोऽपि पद्माशया । भ्रांतस्त्वं तमभिव्रजन्नसि तदा शिक्षाथ केषामिह ॥ २९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्मिन् जीवहितावहे जलधरे दानैकनिष्ठे पयः-पूरैः पूर्णमिलातलं रचयितुं बद्धादरे सत्यपि ॥ रे
चंडानिल यद्दिशोदिशमयं दूरं त्वया क्षिप्यते । प्राणिप्रौढमनोरथैः सह तदा क्षुद्र क्षयं प्राप्नुहि ॥ ३० ॥
तापयसि जगदशेषं । तत्ते चरितं न सुंदरं शूर ॥ भुवनप्रकाशको य-न्मित्रमसि त्वं जगच्चक्षुः ॥ ३१ ॥
अंभोधर त्वमधुनांबु जनाय नो य-द्दत्से तदेष भवतावसरो न लभ्यः ॥ काले प्रचंडपवनप्रहतस्य
यस्मा—न्न त्वं न चांबुकणिकाप्युपकारकृत्ते ॥ ३२ ॥ श्रीपुष्करावर्तमुखा विदध्यु-स्त्वत्पूर्वजाः सत्वरमंबु,
वृष्टिं ॥ तद्वंशजन्माप्यधुना विलंब्य । दत्सेंबु धाराधर तन्न युक्तं ॥ ३३ ॥ अयि सितच्छदसुंदर मा
कृथाः । खलबलाहकपंक्तिगतः सखे ॥ निजगुणान् प्रकटान् यदयं गणा । न गुणविद्विगुणो गुणमत्सरी
॥ ३४ ॥ नो वारिवाह पयसः स्पृहयालुनास्य । त्वत्तस्तु तुष्यति परं मधुरोक्तिभिर्यः ॥ कस्ते त्वदेकशरणं
शिखिनं वयस्यं । यद्गर्जितैरपि विनोदयितुं विलंबः ॥ ३५ ॥ रे रे कुरंगवर निर्झरनीरधारा-माकंठमापिब
सखे खलु संप्रति त्वं ॥ एषापि दुर्लभतरा पुरतः प्रसर्प-त्युष्णे खले मरुति यत् क पयोलवोऽपि ॥ ३६ ॥
पश्यन् वक्रदृशा परस्य चरितं धूर्तावलीग्रामणीः । काकस्त्वं कपटी पशून् वृणवतश्चंचुप्रहारैस्तुदन् ॥

For Private and Personal Use Only

अक्षुद्रप्रकृतींल्लघूनपि खगानुद्वासयंश्छद्मना । तस्मात्कौशिक एक एव भवतः शिक्षाप्रदानक्षमः ॥ ३७ ॥
रे चंचरीक तुदतीं कटुकंटकौघै—र्यत्केतकीं भजसि रक्तमनस्क धिक्त्वां ॥ प्रख्यापयन् परिमलैक-गुणं जनेषु । संतं घनास्वपि जपादिकगुल्मिनीषु ॥ ३८ ॥ किं प्रतारयसि चातकं भवत्—कल्पितैकशरणं शरद्घन ॥ उर्जितैरतनुगर्जितैश्च किं । बिंदुमात्रमपि नो ददासि चेत् ॥ ३९ ॥ विंध्योर्वीधरसल्लकीकवलनं तां शर्मदां नर्मदां । स्वच्छस्वादुपयःप्रभूतलहरीलीलावतीं च स्मरन् ॥ आः किं भद्र गजेंद्र दुर्बलत-नुस्त्वं चिंतया जायसे । यद्दैवात्समुपस्थितं तदखिलं धैर्यात्क्षमस्वाधुना ॥ ४० ॥ प्रीणयस्यमृतदीधिते द्युता । निर्विशेषमखिलं जनं पुनः ॥ किं विनाशितमनेन तत्र य—च्चक्रवाककुलमर्दयस्यदः ॥ ४१ ॥ विदुरैस्तुलितोऽसि वल्ल चे—द्घनसारेण समं स्वकार्यतः ॥ युवयोः परमंतरं मिथो । बहुलं मदं तेन प्रयाहि मा ॥ ४२ ॥ किं हस्तिनि द्विरदमंगजमात्मनोनं । प्रख्यापयस्यनुदिनं बलिनं च शूरं ॥ यद्यस्त्ययं बहुबलो बहुतस्तथापि । किं षोडशीमपि कलां लभतामिभारेः ॥ ४३ ॥ रे चक्रवाक भवतो न वियो-गदुःखं । सूर्येण भिन्नमथ तस्य किमुक्तिरत्र ॥ किं निष्फलां स्मृतिमहर्निशमेतदीयां । निर्मासि निस्त्रप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि विचारमूढ ॥ ४४ ॥

क्षीरोदकव्यक्तिकरोऽसि हंस । माभूरहंकारमनास्तथापि ॥ तद्व्यक्तिकर्त्री भुवि मक्षिकापि । कापि समस्ति खलु संप्रति दुग्धलुब्धा ॥ ४५ ॥ धिग्विधे तव विधानकौशलं । पंक्तिभेदभवपातकाशुचेः ॥ श्रीयुतो विहित एकको नरो । निर्धनो बत विलोक्यते परः ॥ ४६ ॥ लोकैर्यष्टिप्रभृतिभिरपि व्याहता न त्यजंति । स्वस्थानं ये कदशनलयाः कुर्कुराद्याः परे ते ॥ ये तिष्ठंति व्यपगतभयं सानुमत्कंदरासु । न्यक्कारेऽपि क्षुधितमनसस्ते वयं पंचवक्त्राः ॥ ४७ ॥ चतुरहृदयहारिणीगतिस्ते । वपुषि बलं च महत्त्वमप्रमाणं ॥ गजवर दलमंडनं तथपि । क्षिपसि रजः शिरसीति किं चरित्रं ॥ ४८ ॥ परिशीलयसीह किं सरो । बहुसेवालमलं सितच्छद ॥ यदि दास्यति शैवलादि तद् । भविता प्रत्युत ते त्रपाकरं ॥ ४९ ॥ म्लानांबुजानि कलुषोदकशैवलानि । चक्रे सरांस्यथ मरिष्यति हंसवर्गः ॥ मा चिंतयेति घन यत्कनकाब्जवंति । भूयांसि मानससरःप्रमुखान्यमुष्य ॥ ५० ॥ आजन्मावधिनिर्मितातिबहला शाखाप्रशाखादलैश्छाया यैः परिशीलितं जलनिधे तीरं पुनस्तावकं ॥ तानुन्मूलयसि प्रवर्धितपयोलक्ष्म्याभिवृद्धस्मया ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्दानावसरेऽपि तेन बत ते धन्या गुणज्ञातृता ॥ ५१ ॥ मृगतृष्णिकेव च मुधा निजरागं । दर्शयन्निह पलाश कथं त्वं ॥ विप्रतारयसि पांथजनानां । नासि किंचिदपि दातुमलं वै ॥ ५२ ॥ अधःसंचितानंतनीरोऽपि कूप । प्रदत्सेंबु रज्ज्वादियंत्रप्रयासात् ॥ स्ववारेऽपि नोचैर्व्रजन् किं यदेतत् । प्रभूतं जलं नोरवाहप्रसादात् ॥ ५३ ॥ कोकिल त्वमपरत्र विहारं । सांप्रतं वितनु येन रसालः ॥ फाल्गुनाधमसमीरणसंगो । मंजरीप्रभृति दास्यति नैव ॥ ५४ ॥ कंठीरव प्रौढपराक्रमोऽपि । ख्यातिं दधानो मृगराजनाम्नीं । वार्तास्तु दूरे मृगपोषणस्य । कियद्बलं ते हननेऽपि तेषां ॥ ५५ ॥ हरिचंदन मा कृथा वृथा । ननु चिंतां मलयाचलोज्झित ॥ भविताादरणीयता यतो । भवतस्तापभिदः पदे पदे ॥ ५६ ॥ अनिशं सहकारमंजरीं । कलकंठ स्मरसीह किं वृथा ॥ समयं परिहाय नो यतो । भवतः संस्मृतितः समेति सा ॥ ५७ ॥ परिशीलयितुं समुत्सुकः । सरसं चूततरुं विहाय किं ॥ शुक कुष्टफलं यतस्त्यजे-न्न कठोरत्वमिदं कदाचन ॥ ५८ ॥ किं चाटूनि गदसि चातकपोत मिथ्या द्वित्रांबुबिंदुकृतयेंबुधरस्य भाग्यं ॥ चेदस्त्यवंध्यमिह ते तटिनीव तर्हि । भूयस्तरं जलमवाप्स्यसि वारिवाहात् ॥ ५९ ॥ अपरत्र मराल सांप्रतं । विचरैतन्न सरोवरं सखे ॥

For Private and Personal Use Only

बहुलाटिबकोटटिट्टिभै–र्यत्स्वाधीनमिदं विनिर्मितं ॥ ६० ॥ नानाप्रकारैः परिशीलय त्वं । मधुव्रतामुं मुकुलं नलिन्याः ॥ परं कदाचित्समये विरूपे । प्राप्ते यदस्या भवितैव बंधः ॥६१॥ मुह्यसे भ्रमर किं हृदि स्मरन् । कोमलां कमलिनीमिमां यतः ॥ त्वं गमिष्यसि वयस्य तत्र सा–वश्यमस्त्यनुसरोऽनुकाननं ॥ ६२ ॥

बालान् विश्वसितान् यथेष्टसलिलैः सिक्तान् तनुभूरुहान् । संवर्ध्य प्रथमं त्वदेकशरणानात्मीयतीरोद्गतान् ॥ उन्मूल्य क्षिपसि क्षणेन बहुलैर्दूरे जलप्लावनै–र्गर्विष्ठेंबुदवृष्टिवर्धितजला धिक् त्वां ततो निम्नगे ॥ ६३ ॥ अंभोऽर्पणव्यसनतस्तु पिपासितानां । ग्रीष्मेऽप्यसज्जलधिगे खनितापि दत्से ॥ पानीयबिंदुमपि पेयमयं भवत्या । दत्ते परं न रमणः कृपणः समुद्रः ॥ ६४ ॥ अयि कीरकुंजर कथं न हि ते । भवति त्रपा फलितचूततरुं ॥ शुभगोस्तनीं च कदलीं सरसां । परिहाय निंबफलमत्सि यतः ॥ ६५ ॥ द्विरदाः प्रचुरा इमे ममे–ति धिया विंध्यगिरे जहासि किं ॥ दलमंडनतां भजंत्यमी । पुनरेभिर्भविता तवैव हानिः ॥ ६५ ॥ आननमभितो यदसि । त्र्यधिकत्रिंशत्सुपर्वकोटीनां । अद्यास्तच्च ततोऽनल । युक्तं यत्त्वं सर्वतोभक्षी ॥६६॥ विंध्याचलेन गजराज यथा प्रसूत–स्त्वं कर्षितस्तव तथापि न कापि हानिः ॥

यद्यस्ति ते परचमूदलनाय शक्तिः। कल्याणिनी खलु नृपादरणीयता च ॥६७॥ स्वकपोलमदैः प्रलोभित–श्चिरमेष प्रथमं मधुव्रतः ॥ तमथो गजराज निघ्नतो। न हि लज्जापि समभ्युपैति ते ॥ ६९ ॥

दविष्टसंदर्शितरम्यरूपं। तुंगं महांतं बत सानुमंतं ॥ मावापिथाः पांथ समीक्ष्य मोहं। दृषन्मयोऽयं कठिनो यदस्ति ॥ ७० ॥ श्रीखंडरक्षणकृते परितो भुजंगै–र्वृत्तिं करोषि मलयाचल मत्सरी सन् ॥ मिथ्यैव सा हि गुणिनो यदिवा निरुद्धा–स्तत्किं निरुद्ध इदमीयगुणज्ञलोकः ॥ ७१ ॥ किं खिद्यसे भ्रमर कंटकिपंकजिन्या। मुद्राणकोशकुहरे पतितः प्रसह्य ॥ यद्वाह्यहार्दमनया बहु दर्शयित्वा। त्वद्भ्रातरः किल वयस्य न पातिताः के ॥ ७२ ॥ नलिनि त्वमर्तिमथ मैव कृथा। नवरंगभाजि कनकद्रुसुमे ॥ मनुते रतिं मधुकरः किल य–न्न हि कः कलाविह नवाभिमुखः ॥ ७३ ॥ नक्रासन्नीकृतोऽपि स्वकरसरसिजद्वंद्वमास्थापितः सन्। भूयोभूयोऽर्थितोऽपि त्वमथ नहि कदाप्यत्र सौरभ्यलेशं ॥ दत्से हे काकतुंड प्रकृतिखरतरस्तेन जाज्वल्यमान–ज्वालाजिह्वेन दग्धः सकलमपि हहा हारयिष्यस्यवश्यं ॥ ७४ ॥ त्रयस्त्रिंशत्कोटित्रिदशमुखमग्ने पुनरपि। प्रतीतिं बिभ्राणस्त्रिदशपरपर्यायजनितां ॥ प्रकुर्वंतं सेवामपि दहसि होतार-

मधमः । क्षणं स्पृष्टो युक्तं न हि भवति तेजस्विन इदं ॥ ७५ ॥ ददन् जलं त्वं समयतोऽरघट्ट । किं चाक-
चिक्यं कुरुषेऽल्पदायिन् ॥ यद्घनमालोकय वारिवाहं । जलस्थलैकीकरणं क्षणेन ॥ ७६ ॥ रेवानदीसलि-
लविंध्यमहीध्रजात–सत्सल्लकीविपिनकेलिरनेकपस्य ॥ आत्ता त्वया द्रुहिण किं त्विदमीयमेव । क्षिप्रप्र-
भंजनबलं त्वयका ह्रियेत ॥ ७७ ॥ फलाशया मालिक आलवाल । उप्त्वा भवंतं पयसाभिषिंचन् ॥ कृत्वा
वृतिं प्रागवतिस्म यत्नात् । फलेन वंध्यः किमभूरथाम्र ॥७८॥ कंठीरवाकुंठकठोरवीर्य । भवान् समर्थोऽ-
पि किमर्थकारी ॥ त्वत्तोऽल्पशौर्या अपि सैरभेयाः । परोपकारं रचयंति लोके ॥ ७९ ॥ बालेय शाड्वल-
यवानधिगम्य पृष्टे । गंडोलयन् किमधुना वहसेऽभिमानं ॥ यत्सर्वदैतदशनाः कुलजास्तुरंगा–स्त्वं तूज्झि-
तावकरशुष्कतृणैकभोजी ॥ ८० ॥ सरसं शुभवर्णमुत्तमं । फलमासाद्य मदो विधीयते ॥ किंपाकद्रुम किं
त्वया सदा । विषमिश्रितमंतर्दुरात्मना ॥८१॥ समानलक्ष्मीण्यपि चैकपंक्ति–गतानि पद्मानि च कैरवाणि ॥
स्मेराणि मुद्राणि सृजन् सहस्र–भानो न युक्तं तव पंक्तिभेदिन् ॥ ८२ ॥ एकारण्यनिवासिनः सहचरी-
भूतस्य दुष्टात्मनो । भल्लूकस्य विमुग्धरंजनवचोलालित्यमातन्वतः ॥ हे सारंग न विश्वसे ऋभुमते

येनैष मित्राण्यपि । द्रुह्यत्यर्जितकैतवो न हि कृते भद्रेऽपि भद्रंकरः ॥ ८३ ॥

यदि समयवशादयं द्विरेफो । विलसति कासकरीरकिंशुकेषु ॥ न हि मुदमदसीयमानसं तु । स्पृशति विना मृदुमालतिप्रसूनं ॥ ८४ ॥ पुरा नर्मदानिम्नगाकेलिभाजो । द्विपास्तर्जनामात्रकेऽप्यक्षमाये ॥ क्षमंतेऽधुना तेऽप्यहो दैवयोगा–ज्जराजर्जराः काकचंचुप्रहारं ॥ ८५ ॥ यद्वासरान् गमयति भ्रमरः करीर–पुष्पेषु तत्र मधुपस्य न मल्लिकायाः ॥ मंतुः परं त्वतिकठोरतुषारराशे—र्यत्प्लोषितानि सकलानि सुमान्यनेन ॥ ८६ ॥ वृद्धिभाक्क्षुदधे न दधासि । यत्पुनर्व्रजसि दूरतरं च ॥ दृष्ट्वेर्ष्ययेव जलदं जलदानैः । प्रीणयंतमवनीमिति मन्ये ॥ ८७ ॥ माकंदमेनमपकारभयादनिघ्नन् । पांथाश्मभिः कथमिह स्थितिमातनोषि ॥ तेषां यदेष फलदो दृषदादिभिर्यै—राहन्यते च कपिवत्परिमर्द्यते वा ॥ ८८ ॥ यदर्कपुष्पेषु मधुव्रतोऽसौ । तुच्छेष्वभव्येष्वपि रंरमीति ॥ तदस्य किं वाच्यमनेन यन्न । जपादिपुष्पं भ्रमतापि लब्धं ॥ ८९ ॥ मत्तद्विपेंद्र करिणीरसलोलुपः स—न्नुद्यौवनत्ववहमानमदप्रवाहः ॥ क्षुद्रा अमी इति धिया तुदसि द्विपेंद्रां—स्तद्द्रक्ष्यसि स्वसमये यदिमे सृजंति ॥ ९० ॥ यदि कंटककोटिकोटिभि–र्भ्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मर त्वां तुदतीह केतकी ॥ तदिमां त्यज येन मालती–प्रमुखाः संति लता न किं तव ॥ ९१ ॥ आत्मीयवर्गोन्नतिलेशमात्रं । मृगाधिराज क्षमसे नयेन ॥ तद्दर्शनात्प्रत्युत कोपनस्त–स्त्यक्ते ह्यरण्ये भ्रमसि त्वमेकः ॥ ९२ ॥ किं मदं वहसि सागर गर्जन् । मत्पुरो यदितरे खलु तुच्छाः ॥ किं महानपि भवान्न हि पीतो–ऽगस्तिना हि मुनिना कुतुकेन ॥ ९३ ॥ पावक यदस्त्रमन्य–त्तदेकधारं द्विधा त्रिधा धारं ॥ अधमः परो न भवतो । निर्हंसि यत्सर्वतो धारः ॥ ९४ ॥ बप्पीह हे किमनया घनयातिदीन—वाग्याञ्चया च निभृतोन्मुखवीक्षणेन ॥ स्वं खेदयस्यनुदिनं यदयं तडित्वान् । द्वित्रान् प्रदास्यति न वा सलिलस्य बिंदून् ॥ ९५ ॥ हे चंपकद्रुम सुवर्णसवर्णवर्ण—पुष्पाणि विभ्रमकराणि जहासि दूरं ॥ संप्रेरितः खलवदुल्बणमारुतेन । स्थास्यंति भूपतिशिरस्सु परं त्वमूनि ॥ ९६ ॥ अव्यावृतं च कलुषं च सशैवलांबु । वार्धिष्णुनोरविभवः किमु कूप धत्से ॥ यत्कोपिऽ कांक्षति न मामधुनांबुधारै—वर्षंतमंबुदममुं मनुजः स्तवीति ॥ ९७ ॥ माकंदद्रुम मंजरीशुभफलश्रेणीगृहस्याध्वगान् । श्रांतान् प्रीणयितुं फलैः शुभवतस्ते वासराः सांप्रतं ॥ किंवा कर्कशकंटकोत्कटवपुर्बब्बूलवृत्त्यंतरा—स्थायी प्रत्युत दापयस्यतितरां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषां भयं भूभृतः ॥ ९८ ॥ किं चातकं जलद जल्पयसीह दीन-वाचा विदन् यदयमर्पितनीरजीवी ॥ देयं ममेत्यथ च तत् प्रणयोक्तिमिश्र । लज्जा तवैव खलु देहि रसेन नीरं ॥ ९९ ॥ वहिर्मधुरिमोज्ज्वलैर्घनकषायपीनोदरैः । प्रतारयसि यज्जनं कनककांतिभिस्त्वं फलैः ॥ समागतमनुत्तरोत्तररसोपलंभाशया । चरित्रमधमं ततस्तव रसालकारस्कर ॥ १०० ॥

सति घनेऽप्यशनेऽथ यथाक्षुधं । यदपरेषु कुटुंबिषु कुर्कुर ॥ अधृतिमातनुषे भवतस्तदा । बुधजनैः करटोऽप्यथ वर्ण्यते ॥१॥ स्पर्धयन् महिष दंतिना समं । स्वेच्छया विचरणोच्छलद्दलः ॥ स्वामिशीतलदृशैव जीवसि । दुस्सहस्तव यतः कराहतिः ॥ २ ॥ रंगत्तरंगनिकरैर्विपुलोच्छलद्भिः । किं भापयन् जलनिधे ननु गर्जसि त्वं ॥ अद्यापि कोऽपि पथिकः किल यत्पिपासुः । किं तोषितोऽस्ति भवता जलबिंदुनापि ॥ ३ ॥ न दत्तं ग्रीष्मर्तावपि च तव शीतर्तुसमये । पयस्तृष्णाभोगाकुलितमनसश्चापि निभृतं ॥ कृतं तद्याश्चाभिर्बहुभिरथ बप्पीह जलदो-ऽधुनायं तद्दाताखिलजगति तत्तेऽपि सुलभं ॥ ४ ॥ यन्नाम्ना च हितोपदेशवचनं ते तावदिच्छंकराः । किं स्युः क्वाप्यथ चेद्भवंति च तथा शिक्षासहास्ते कुतः ॥



For Private and Personal Use Only

स्वार्थव्यग्रधिया परंतु सुधिया तत्संज्ञया ज्ञापनं । तेनाप्रीतिकरं क्षमंतु सुजनाः सर्वंसहाख्यातिनः ॥ ५ ॥
अथ प्रशस्तिः–साहिश्रीमदकब्बर–सभासमक्षं प्रणीतजयवादाः ॥ चातुर्विद्यसमुद्राः । विजयादिमसेन-सूरींद्राः ॥१॥ तेषां सुशिष्यमुख्या । विबुधाः श्रीसंघविजयनामानः ॥ अनवद्यहृद्यविद्या । विद्याधरनंदिनी-रमणाः ॥ २ ॥ तच्चरणपद्मयामल–मकरंदास्वादनैकषट्चरणः ॥ व्यदधद्दर्शनविजयो—ऽन्योक्तिशतं चतु-रश्चित्रकरं ॥ ३ ॥ श्रीतपागच्छराज्ये । जयिनि श्रीविजयदेवसूरींद्रे ॥ सप्तदशशतत्रिसंव—द्गुंफितमेत-च्चिरं जयतु ॥ ४ ॥

॥ इति पंडितश्रीसंघविजयगणिचरणारविंदमधुकरेण गणिदर्शनविजयेन विरचितमन्योक्तिशतकं संपूर्णं ॥

आ ग्रंथ श्रीजामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेय माटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

gyanmandir@kobatirth.org

॥ इति श्रीअन्योक्तिशतकं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only